# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री-३ (SEM-5) | **प्रश्नपत्रम्** - ८ | **गुणाः** - ७० |
| **विषयः** - नव्यन्यायः | **कोड- CE- 3510** | **समयः** - १० तः १ |
| **दिनाङ्कः** - १२/१२/२०१८ | **सन्दर्भग्रन्थः**- अवयवः | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वौ समाधेयौ ।** **१०**

१. परार्थानुमानं प्रति पञ्चावयवानां कारणत्वं प्रतिपादयत ।

२. यथाग्रन्थं मध्यस्थानुमितिं व्याख्यात ।

३. पञ्चावयवानां संभूयैकर्थप्रतिपादकत्वं स्पष्टयत ।

**प्र-२ एक एव समाधेयः ।** **१०**

१. अनुमितिचरमकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः । मणिकारवचनं विविच्यताम् ।

२. उचितानुपूर्वीकप्रतिज्ञापञ्चकसमुदायत्वं न्यायत्वम् - व्याख्यात ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ द्वौ समाधेयौ ।** **१०**

१. प्रतिज्ञादिभिः पञ्चभिः वाक्यैः कथमनुमितिः सम्भवति?

२. प्रतिज्ञाद्यघटकत्वविशेषणस्य सार्थक्यं प्रतिपादयत ।

३. यथाग्रन्थं सोदाहरणं प्रतियोग्यनुयोगिभावं विशदयत ।

**प्र-४ एक एव समाधेयः ।** **१०**

१. अवयवत्वन्तु न्यायन्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमवत्वम् - व्याख्यात ।

२. प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानजनकवाक्यत्वं तत्वमिति केचित् - व्याख्यात ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ द्वौ समाधेयौ ।** **१०**

१. प्रतिज्ञालक्षणं विलिख्य साध्यपदे अतिव्याप्तिः आशङ्क्यताम् ।

२. उदाहरणाच्च न पक्षतावच्छेकविशिष्टे साध्यवैशिष्ट्यज्ञानम् - व्याख्यात ।

३. मिश्रोक्तं प्रतिज्ञालक्षणं विशदयत ।

**प्र-६ एक एव समाधेयः । १०**

१. न च कोट्यप्रसिद्ध्या प्रमेयं न वेति विप्रतिपत्तेः संशयस्य चायोगात् न तादृशी प्रतिज्ञा - व्याख्यात ।

२. निगमने साक्षात्पक्षवाचकपदं न श्रूयते, तथापि न्यूनताभङ्गायोपस्थाऽयमादिपदानुषङ्गात्तथा बोध्यम्-व्याख्यात ।

**प्र-७ दशप्रश्नानां लघूत्तराणि लिखत । १०**

१. पञ्चावयवानां नामानि लिखत ।

२. हेतोः पञ्चधर्माः के?

३. सूत्रकारीयन्यायलक्षणं लिखत ।

४. दीधितिकृतम् अवयवलक्षणं लिखत ।

५. यद्रूपपदेन किं ग्राह्यम्?

६. पर्वतो वह्निमान् धूमात् - इत्यत्र प्रतिज्ञावाक्यं किम्?

७. प्रतिज्ञाविधायकं सूत्रं लिखत ।

८. अनुमानस्य द्वैविध्यं लिखत ।

९. किन्नाम व्यापकत्वम्?

१०.व्याप्तिप्रतिपादकेन उदाहरणेन किं बोध्यते?

११.प्रतिज्ञालक्षणस्थसाध्यपदकस्य कोऽर्थः ?

१२.जातिघटितप्रतिज्ञालक्षणं लिखत ।

१३.को नाम पक्षः?

१४.तत्वचिन्तामणिकारः कः ?

१५.किन्नाम परामर्शः ?